# Shri Raghavendra Padukapujavidhanam

# श्रीराघवेन्द्रपादुकापूजाविधानम्

## Document Information

Text title : Shri Raghavendra Padukapujavidhanam

File name : rAghavendrapAdukApUjAvidhAnam.itx

Category : deities_misc, gurudev, pUjA

Location : doc_deities_misc

Author : Krishna Avadhutapandita Vedavyasacharya

Proofread by : Gopalakrishnan, PSA Easwaran

Description/comments : from Raghavendra Tantram

Latest update : December 18, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 18, 2021

*sanskritdocuments.org*

# श्रीराघवेन्द्रपादुकापूजाविधानम्

श्रीगुरोः पादुकापूजाविधानं गृहधर्मिणाम् ।
कृष्णावधूतो वक्ष्येऽहं गुरोरभिमतं यथा ॥ १॥

ध्यानमावाहनं पश्चादासनं स्नानमक्षताः ।
गन्धपुष्पाणि नैवेद्यं धूपो दीपो निराजनम् ।
पुष्पाञ्जलिर्द्वादशैव पादुकापूजने क्रमे ॥ २॥

अथ पादुका पूजाविधिः ।
सायङ्काले गृहे स्नात्वा कृत्वा सन्ध्याजपादिकम् ।
हरिं वायुं च सम्पूज्य पादुके पूजयेद्गुरोः ॥ ३॥

अथ ध्यानम् ।
पादुके गुरुराजस्याऽपादिके सर्वसम्पदाम् ।
बाधिके सर्वबाधानां साधिके भवतां मुदे ॥ ४॥ - इति ध्यानम् ।

पादौ पादुकयोरत्रावाहयामि महागुरोः ।
अत्र सन्निहितौ भूत्वा कामदौ भवतं मम ॥ ५॥ - इत्यावाहनम् ।

इदमासनमास्तीर्णं तिष्ठतामत्र पादुके ।
कुरु त्वं गुरुराजस्य कृपा मे स्याद्यथा तथा ॥ ६॥ - इत्यासनम् ।

शुद्धैः सुगन्धिभिः शीतैः सलिलैः स्नपयामि वाम् ।
राघवेन्द्रगुरोः पादौ तापं मे हरतां सदा ॥ ७॥ - इति स्नानम् ।

फलैः क्षीरैः शर्कराद्यैः स्नानं चेत् पूर्वमाचरेत् ।
गुरुराजपदाम्भोजन्यासप्रयत पादुके ॥ ८॥

अक्षतान् वां प्रदास्यामि कुरुतं मामिहाक्षतम् । - इति अक्षतान् ।
गुरुपादरजोगन्धलिप्ताङ्गे पादुके युवाम् ॥ ९॥

गृहीत्वा सुरभिं गन्धं वर्तेयथां सुरद्रुमौ ॥ १०॥ - इति गन्धम् ।

मल्लिकादि सुपुष्पाणां माला श्रीगुरुपादुके ।
असितानि च पुष्पाणि गृहीत्वाऽवतमेव माम् ॥ ११॥ - इति पुष्पम् ।

यथाशक्ति यथाकालं भक्त्याऽऽनीतं फलादिकम् ।
स्वीकृत्य सफलं मां च कुरुतं गुरुपादुके ॥ १२॥ - इति नैवेद्यम् ।

श्रीराघवेन्द्र राजेन्द्रमुनीन्द्रपदसङ्गते ।
पादुके वां प्रदास्यामि धूपं सर्वमनोहरम् ॥ १३॥ - इति धूपम् ।

अन्धकारहरं चक्षुःसफलीकरणे पटुम् ।
दर्शनार्थं च वां दीपं दर्शये गुरुपादुके ।
श्रीराघवेन्द्राय नमः दीपं दर्शयामि ॥ १४॥ - इति दीपम् ।

नीराजनत्रयं कार्यमधिकं विभवो यथा ॥ १५॥

जयतु जयतु पादूः पातकध्वंसकर्त्री
    जयतु जयतु बन्धुर्बन्धनिर्नाशयित्री ।
जयतु जयतु मित्रं मातृवद् रक्षयित्री
    जयतु जयतु राजद्राघवेन्द्राङ्घ्रिधात्री ॥ १६॥

श्रीमत्सद्गुरुपादसङ्गविभवे श्रीपादुके पादुके
    पाटीरामलगन्धबन्धुरतनू श्रीपादुके पादुके ।
नानालोकशिरोभिलालितमहा श्रीपादुके पादुके
    देहि त्वं मम मङ्गलं तव भजे श्रीपादुके पादुके ॥ १७॥

गुरुवरपदपद्मपूतदेहे मम मुखमस्त्विति पादुके श्रये त्वाम् ।
मयि सदयमनास्त्वदेकभक्ते मृदुलतनूदरि सुन्दरि प्रसीद ॥ १८॥ - इति नीराजनम्
।

वन्दे त्वां देवि देवव्रतियतिपतिपद्धूलिकालिप्रलिप्ते
    भूयो भूयो दया मे भवतु वृतवरे मानयानस्य दिव्ये ।
मानं ज्ञानं धनं मे दिश दिश दशधा पादुके दुष्टदुःखात्
    पाहीतो हीनहीनात् सखसखि सुखिनं मां तनूत प्रतप्तम् ॥ १९॥

कामदात्री सकामानामन्यैकामृतदायिका ।
काले कालेऽघकार्मासं दद्यात् काप्यार्यपादुका ॥ २०॥

सतरलां नलिनेन तवाङ्कके प्रणिदधामि गुरूत्तम पादुके ॥ २१॥

श्रीराघवेन्द्र गुरुराजपदारविन्द
    संसर्गलब्धसुगुणैः जगति प्रपूज्य ।
श्रीपादुके सुमुखि सुन्दरि सूक्ष्ममध्ये
    पुष्पाञ्जलिं वृणु विधेहि सुमङ्गलं मे ॥ २२॥

प्रदक्षिणनमस्कारौ करिष्ये पादुके तव ।
मामुद्धर कृपापूर्णे भवदुःखाम्बुधेर्द्रुतम् ॥ २३॥

अनेकधा यथायोग्यमुपचारान् समर्पयेत् ।
कृत्वाऽऽभीष्टप्रार्थनां च सर्वतन्त्रे समर्पयेत् ॥ २४॥

श्रीगुरोश्चरणपङ्कजसङ्गान्मोदमानहृदये मृदुलाङ्घ्रि ।
इष्टपूर्तिरधुना मम भूयाः शिष्टशीर्षपरिपालितमूर्ते ॥ २५॥

पाहि मां सुमुख वत्सलभावाद्वाहिका त्वमसि भक्तभरस्य ।
या हि मे विपद उच्छ्रितसर्पाः ता हिनस्ति नमनं तव पादू ॥ २६॥

पायाः मां श्रीगुरुराघवेन्द्रचरणापायापहारोद्यते
    मायापाशविनाशिनि प्रभजतां हेयाखिलारोज्झिते ।
दायादेऽमरपादपस्य च परीधूयाखिलं पातकं
    जायापुत्रगृहादि संसृतिषु मे भूयाः मुदे पादुके ॥ २७॥

इति श्रीमत्कृष्णावधूतपण्डितकृतौ श्रीराघवेन्द्रतन्त्रे
    त्रयोदशपटले पादुकापूजाविधानं सम्पूर्णम् ।

Proofread by Gopalakrishnan, PSA Easwaran

*Shri Raghavendra Padukapujavidhanam*

pdf was typeset on December 18, 2021

Please send corrections to *sanskrit@cheerful.com*